ग्रहधर्म्मविवेकः। द्वितीये चातुराश्रम्योचितधर्म्मनिरूपणम् ! तथाविधे सप्तमे गुणसमवायप्रतिपादनम्। तत्रापि प्रथमे बुद्धिनिरपेक्षगुणप्रतिपादनम्। द्वितीये तत्सापेक्षगुणप्रतिपादनं समवायप्रतिपादनञ्च। अष्टमे निर्व्विकल्पकसविकल्पकप्रत्यक्षप्रमाणचिन्तनम्। नवमे बुद्धिविशेषप्रतिपादनम्। दशमे अनुमानप्रतिपादनम्। तत्र उद्देशो लक्षणं परीक्षा चेति त्रिविधास्य शास्त्रस्य प्रवृत्तिः। इति वैशेषिकग्रन्थविवरणम् ॥ * ॥

(न्यायमते आत्मादिगतपारिभाषिकगुणः। यथा, भाषापरिच्छेदे।

"बुद्ध्यादिषट्कं सम्पर्शान्ताः स्नेहः सांसिद्धिकोद्रवः।
अदृष्टभावना शब्दा अमी वैशेषिका गुणाः ॥"

विशेष एव। "विनयादिभ्यष्ठक्।" ५। ४। ३४। इति स्वार्थे ठक् ॥ असाधारणे, त्रि। यथा, महाभारते। ७। ५। १५।

"युगपत्तु ते शक्या कर्त्तुं सर्व्वे पुरःसराः।
एक एव तु कर्त्तव्यो यस्मिन् वैशेषिका गुणाः ॥")

वैश्यः, पुं, (विश् + ष्यञ्।) ब्रह्मोरुदेशजाततृतीयवर्णः। (यथा, ऋग्वेदे। १०। ६। १२।

"ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥")

तत्पर्य्यायः। ऊरव्यः २ ऊरुजः ३ अर्य्यः ४ भूमिस्पृक् ५ विट् ६। इत्यमरः ॥ द्विजः ७। इति जटाधरः ॥ भूमिजीवी ८। इति शब्दरत्नावली ॥ व्यवहर्त्ता ९ वार्त्तिकः १० वणिकः ११ पणिकः १२। इति राजनिर्घण्टः ॥ प्लक्षद्वीपे अस्य संज्ञा ऊर्द्धायनः। शाल्मलद्वीपे वसुन्धरः। कुशद्वीपे अभियुक्तः। क्रौञ्चद्वीपे द्रविणः। शाकद्वीपे दानव्रतः। पुष्करद्वीपे सर्व्वे एकवर्णाः। इति भागवतमतम् ॥ अस्य शास्त्रनिरूपितधर्म्मास्त्रयः। अध्ययनम् १ यजनम् २ दानम् ३। चतस्रो जीविकाः। कृषिः १ गोरक्षणम् २ वाणिज्यम् ३ कुशीदम् ४। अस्याश्रमास्त्रयः। ब्रह्मचर्य्यम् १ गार्हस्थ्यम् २ वानप्रस्थम् ३ ॥ तस्य लक्षणादिर्यथा,—

"विशत्याशु पशुभ्यश्च कृष्यादानरुचिः शुचिः।
वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः ॥
वैश्यस्य च प्रवक्ष्यामि यो धर्म्मो वेदसम्मतः।
दानमध्ययनं शौचं यज्ञश्च धनसञ्चयः ॥
पालयेच्च पशून् वैश्यः पितृवद्धर्म्ममर्ज्जयन्।
विकर्म्म तद्भवेदन्यत् कर्म्म यत् स समाचरेत् ॥
रक्षया स हि तेषां वै महत् सुखमवाप्नुयात्।
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे प्रजाः ॥
ब्राह्मणेभ्यश्च राज्ञे च सर्व्वाः परिददे प्रजाः।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ॥
षस्णामेका पिबेद्धेनुं शताच्च मिथुनं भवेत्।
लब्धाच्च सप्तमं भागं तथा शृङ्गेकलक्षुरे ॥
शस्यानां सर्व्वबीजानि एषा सांवत्सरी भृतिः।
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ॥
वैश्ये रक्षति नान्येन रक्षितव्याः कथञ्चन ॥"

इति पाद्मे स्वर्गखण्डे वर्णविभागः २६ अः ॥

अन्यच्च।

"दानमध्ययनं यज्ञो धर्म्मः क्षत्त्रियवैश्ययोः।
दण्डस्तथा क्षत्त्रियस्य कृषिर्वैश्यस्य शस्यते ॥
स्थानमैन्द्रं क्षत्त्रियाणां संग्रामेष्वपलायिनाम्।
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तताम् ॥"

इति गारुडे ४९ अध्यायः ॥

(वैश्यसम्बन्धिनि, त्रि। यथा, महाभारते। १२। ६२। ४।

"क्षात्त्राणि वैश्यानि च सेवमानः
शौद्राणि कर्म्माणि च ब्राह्मणः सन्।
अस्मिंल्लोके निन्दितो मन्दचेताः
परे च लोके निरयं प्रयाति ॥")

वैश्या, स्त्री, (वैश्य + टाप्।) वैश्यजातिस्त्री। तत्पर्य्यायः। अर्य्याणी २ अर्य्या ३। इति जटाधरः ॥ (यथा, मनौ। ८। ३८२।

"वैश्यश्चेत् क्षत्त्रियां गुप्तां वैश्यां वा क्षत्त्रियो व्रजेत् ॥")

वैश्रवणः, पुं, (विश्रवणस्यापत्यम्। "शिवादिभ्योऽण्।" ४। १। ११२। इति अण्।) कुवेरः। इत्यमरः ॥ (यथा, महाभारते। २। १०।२।

"तपसा निर्म्मिता राजन् स्वयं वैश्रवणेन सा ॥"

शिवः। यथा, महाभारते। १३। १७। १०३।

"धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा ॥")

वैश्रवणालयः, पुं, (वैश्रवणस्यालयः।) वटवृक्षः। इति हेमचन्द्रः ॥ (यथा, देवीभागवते। ७। ३०। ८१।

"अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये ॥")

कुवेरपुरी च ॥

वैश्रवणावासः, पुं, (वैश्रवणस्यावासः।) वटवृक्षः। इति जटाधरः ॥ कुवेरगृहञ्च ॥

वैश्रवणोदयः, पुं, (वैश्रवणस्योदयो यस्मिन्।) वटवृक्षः। इति रत्नमाला ॥

वैश्वदेवः, पुं, (विश्वदेवस्यायम्। विश्वदेव + अण्।) विश्वदेवसम्बन्धिहोमादिः। यथा,—

ब्रह्मोवाच।

"वैश्वदेवं प्रवक्ष्यामि होमलक्षणमुत्तमम्।

पर्य्युक्षणमग्निं पर्य्युक्ष्य। क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः। इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्। ॐ पावक वैश्वानर इदमासनम्। अवनीगर्भसंस्कृतः तेजोरूपो महाब्रह्ममुहूर्त्तान्बिधु वैश्वानरं प्रतिबोधयामि। वैश्वानरोऽत्र उभयं प्रायातु परावतः। अग्निर्नः सुषतीरुपपृष्टे दिवि पृष्टोऽग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश। वैश्वानरः सहसा पृष्टोऽग्निः स नोऽग्निः स्वं दिवा सर्व्वस्मात्तु नक्तं ॐ प्रजापतये स्वाहा। सोमाय स्वाहा। बृहस्पतये स्वाहा। अग्नीषोमाभ्यां स्वाहा। इन्द्राग्नीभ्यां स्वाहा। द्यावापृथिवीभ्यां स्वाहा। धन्वन्तरये स्वाहा। इन्द्राय स्वाहा। विश्वेभ्यो देवेभ्यः स्वाहा भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। भूर्भुव स्वः स्वाहा। देवकृतस्यैनसोऽवयजनमसि स्वाहा। मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा। पितृकृतस्यैनसोऽवयजनमसि स्वाहा। आत्मकृतस्यैनसोऽवयजनमसि स्वाहा। एनस एनसोऽवयजनमसि स्वाहा। यच्चाहं मे विद्वांश्चकार यच्चाविद्वांस्तस्य सर्व्वस्यैनसोऽवयजनमसि स्वाहा। अग्नये स्विष्टिकृते स्वाहा। सूर्य्याय स्वाहा। प्रजापतये स्वाहा। वनस्पतये स्वाहा। अद्भ्यः स्वाहा। ओषधिवनस्पतिभ्यः स्वाहा। गृहाय स्वाहा। देहदेवताभ्यः स्वाहा। वास्तुदेवताभ्यः स्वाहा। इन्द्राय स्वाहा। इन्द्रपुरुषेभ्यः स्वाहा। यमाय स्वाहा। यमपुरुषेभ्यः स्वाहा। वरुणाय स्वाहा। वरुणपुरुषेभ्यः स्वाहा। सोमाय स्वाहा। सोमपुरुषेभ्यः स्वाहा। ब्रह्मणे स्वाहा। ब्रह्मपुरुषेभ्यः स्वाहा। विश्वेभ्यो देवेभ्यः स्वाहा। सर्व्वेभ्यो भूतेभ्यः स्वाहा। दिवारात्रिभ्यः स्वाहा। रक्षोभ्यः स्वाहा। स्वधा पितृभ्यः स्वाहा। ये भूताः प्रचरन्ति दिवा चरन्ति दिवाचरमिच्छन्तो भुवनस्य मध्ये तेभ्यो बलिं पुष्टिकामो ददामि। मयि पुष्टिं पुष्टिपतिर्ददातु। श्वचाण्डालपतितवायसेभ्यः।" इति गारुडे वैश्वदेवविधिः २१९ अध्यायः ॥ * ॥ तस्य प्रयोगो यथा। पूर्व्वाभिमुखः शुचिरुपवीती कुशहस्तः कुशासनोपविष्टः कर्त्ता घृताक्तं दुग्धाक्तं तैलाक्तं जलाक्तं अन्नं आमान्नं वा फलं जलं वा जुहुयात्। यथा जले ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वाहा। ॐ देवकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ पितृकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ आत्मकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ यद्दिवा च नक्तञ्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ यत् स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ एनसः एनसोऽवयजनमसि स्वाहा। ॐ अग्नये स्विष्टिकृते स्वाहा। इत्यनेन जुहुतात्। इति वैश्वदेवकर्म्म। इत्याह्निकप्रयोगतत्त्वम् ॥

(विश्वदेव एव। स्वार्थे अण्। गणदेवताविशेषः। वन्धुभिरकृतविवादस्यैव वैश्वदेवलोकप्राप्तिः। यथा, मनौ। ४। १८३।

"यामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः।
सम्बन्धिनो ह्यपां लोके पृथिव्यां मातृमातुलौ ॥"

विश्वदेवसम्बन्धिनि, त्रि। यथा, महाभारते। १२। ३०१। ८।

"आसुरान् विषयान् ज्ञात्वा वैश्वदेवांस्तथैव च ॥")

वैश्वानरः, पुं, (विश्वस्यासौ नरश्चेति। "नरे संज्ञायाम्।" ६। ३। १२९। इति दीर्घः। ततो